# Shri Vishnu Dvadasha Akshara Stotram

# શ્રી વિષ્ણુ દ્વાદશાક્ષરસ્તોત્રમ્

## Document Information

Text title : Vishnu Dvadasha Aksharastotram

File name : viShNudvAdashAkSharastotram.itx

Category : vishhnu, dvAdasha

Location : doc_vishhnu

Author : gAyatrisvarUpa brahmachari

Proofread by : Vani V

Description/comments : shrI bhagavat viShNudvAdashAkSharastotram uttarArdhaH. Author/publisher comment mentions the cost of the book as bhagavadbhakti

Latest update : March 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# શ્રી વિષ્ણુ દ્વાદશાક્ષરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

અથ ધ્યાનમ્ -

વન્દે ચિન્માત્રમેકાક્ષરમજમમરં પૂર્ણમાનન્દમાત્રં
વન્દે સદ્બ્રહ્મરૂપં હરવિધિવિબુધૈર્ધ્યાયમાનં સુપૂજ્યમ્ ।
વન્દે સન્મન્ત્રબીજં ઋષિગણનિકરૈઃ સ્તૂયમાનઞ્ચ દિવ્યં
વન્દે સંસારસારં સકલગુણનિધિં વાસુદેવં વરેણ્યમ્ ॥ ૧॥

અથ સ્તોત્રમ્ ।

દ્વાદશાક્ષરમન્ત્રસ્ય ઋષિઃ પ્રજાપતિઃ સ્મૃતઃ ।
દેવતા વાસુદેવશ્ચ ગાયત્રીછન્દ ઉચ્યતે ॥ ૧॥

ધ્રુવો બીજં ચ હૃચ્છક્તિર્ભુક્તિમુક્ત્યોશ્ચ પ્રાપ્તયે ।
કૃત્વૈવં વિનિયોગઞ્ચ પ્રાણાયામં ચરેત્ તતઃ ॥ ૨॥

પૂરકે ષોડશાવૃત્યા કુમ્ભકે દ્વાદશસ્મૃતઃ ।
રેચકે તુ દશાવૃત્યા પ્રાણાયામવિધિં ચરેત્ ॥ ૩॥

નાસાગ્રે લોચનકૃત્વા મધ્યે હૃદ્કમલેસ્થિતં !
ધ્યાયેન્નારાયણં દેવં વ્યાપકં બ્રહ્મરૂપિણમ્ ॥ ૪॥

શઙ્ખચક્રગદાપદ્મધરં નીલં ચતુર્ભુજમ્ ।
પીતામ્બરધરં દેવં વિષ્ણું કમલલોચનમ્ ॥ ૫॥

તુલસીદલસંયુક્તવનમાલાસુશોભિતમ્ ।
સુવર્ણમુકુટં રમ્યં દિવ્યકુણ્ડલભૂષિતમ્ ॥ ૬॥

અસઙ્ખ્યચન્દ્રસઙ્કાશ સાક્ષાદ્બ્રહ્મસનાતનમ્ ।
કૈવલ્યમોક્ષદં સત્યરૂપં વિશ્વાત્મકં વિભુમ્ ॥ ૭॥

અથવા રાધિકાનાથં દ્વિભુજં મુરલીધરમ્ ।
આજાનુબાહુકં દિવ્યવદનં શ્યામસુન્દરમ્ ॥ ૮॥

મણિમન્મુકુટં તદ્વત્ કુણ્ડલં પીતવાસસમ્ ।
કસ્તૂરીતિલકં યસ્ય લલાટે સર્વમોહનમ્ ॥ ૯॥

તુલસીમાલયા પદ્મમાલયા મણિમાલયા ।
શોભિતં શાન્તિદં કૃષ્ણમન્તર્હૃત્કમલેસ્થિતમ્ ॥ ૧૦॥

ધ્યાત્વૈવં પુરૂષં પૂર્ણં વાસુદેવં સનાતનમ્ ।
રાજમન્ત્રજપં કુર્યાત્ દ્વાદશાક્ષરનામકમ્ ॥ ૧૧॥

જપાન્તે શ્રદ્ધયાયુક્તઃ પાઠં કુર્યાત્ પ્રયત્નતઃ ।
તં દૃષ્ટ્વા ભક્તિસંસક્તોવાસુદેવઃ પ્રસીદતિ ॥ ૧૨॥

ૐ નમો ભગવતે વાસુદેવાય ।

(ૐ) ઓઙ્કાર મન્ત્રમય પૂજ્ય સદક્ષરાય
પાદત્રયાક્ષરમયાય ત્રયીશ્વરાય ।
વેદત્રયાય ત્રિગુણાત્મત્રિદૈવતાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૩॥

(ન) નમ્યાય સર્વજનહૃત્કમલસ્થિતાય
ચાઙ્ગુષ્ઠમાત્રપુરૂષાય વિભુત્વગાય ।
જ્યોતિર્મયાય તિમિરાન્તકનિર્મલાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૪॥

(મો) મોક્ષપ્રદાય સુખદાય ધનપ્રદાય
જ્ઞાનપ્રદાય સતતં પરમોજ્જ્વલાય ।
બ્રહ્માદિદેવ નિકરૈશ્ચ સુપૂજિતાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૫॥

(ભ) ભક્તસ્ય દુઃખદલનાય ચ રક્ષકાય
ધર્મસ્ય સન્તતમધર્મવિનાશકાય ।
નાનાવતારપૃથિવીતલધારણાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૬॥

(ગ) ગવ્યપ્રિયાય સકલેપ્સિતસમ્પ્રદાય
સત્યપ્રવૃદ્ધિકરણાય સુમઙ્ગલાય ।
કૃષ્ણાવતારકરુણાલયસદ્વ્રતાય

તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૭॥

(વ) વન્દ્યાય સર્વજગતાં સુરસત્તમાય
વંશીવિભૂષિતકરાય મનોહરાય ।
નાના પ્રપઞ્ચ વિલયોદય કારણાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૮॥

(તે) તેષાંહિ દુષ્ટશિશુપાલકકંશકેશિ
કાલીયકાલયવનાદિ ખલેશ્વરાણામ્ ।
માનંવિમર્દ્ય જગતીતલ રક્ષણાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૧૯॥

(વા) વાસાંસિ યસ્ય સકલાનિ તડિન્નિભાનિ
રૂપં નવીન ઘનસન્નિભમાદ્યવર્ણમ્ ।
નારાયણાય નરરૂપ-વિભૂષિતાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૨૦॥

(સુ) સુન્દોપસુન્દદલનાય સુદર્શનાય
હૃત્પદ્મનિષ્ઠ શુભવિગ્રહ શોભિતાય ।
સદ્બ્રહ્મચિદ્ઘનપરાત્પરકેવલાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૨૧॥

(દે) દેવાય ભક્તભવસાગરતારણાય
દુર્દન્તવક્રશિશુપાલક કર્દનાય ।
લીલાર્થમેવ જગતીતલમાગતાય
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૨૨॥

(વા) વાયુસ્તથૈવ વરુણોઽગ્નિ શશાઙ્કરુદ્રા
ઇન્દ્રાશ્વિનીસુતકુબેરયમા અજશ્ચ ।
સ્તુન્વન્તિ યં સતતમેવ સમસ્ત વેદાઃ
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૨૩॥

(ય) યસ્યાક્ષરસ્ય નિરવદ્યનિરઞ્જનસ્ય
સંસારદુઃખરહિતસ્ય સુદુર્લભસ્ય ।
જાનન્તિ નૈવ મહિમાનમશેષ જીવા
તસ્મૈ નમો ભગવતે પરમામૃતાય ॥ ૨૪॥

દ્વાદશાક્ષરનામાખ્યં સ્તોત્રં યદ્રચિતં મયા ।
સમર્પયામિ દેવાય કૃષ્ણાય પરમાત્મને ॥ ૨૫॥

દ્વાદશાક્ષરસંયુક્તં સ્તોત્રં સર્વોત્તમં શિવમ્ ।
યઃ પઠેત્ પ્રાતરુત્થાય જ્ઞાનં સદ્યઃ સ વિન્દતિ ॥ ૨૬॥

સદા સદ્ભક્તિભાવેન ધ્યાત્વા હરિપદામૃતમ્ ।
પાઠમાત્રેણ સદ્ભક્તો ગચ્છેદ્ધિ હરિમન્દિરમ્ ॥ ૨૭॥

ઇતિ શ્રી ગાયત્રીસ્વરૂપ બ્રહ્મચારિણા વિરચિતં શ્રી વિષ્ણુ
દ્વાદશાક્ષરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Vani V

*Shri Vishnu Dvadasha Akshara Stotram*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*